॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ९

कस्य चित्त्वथ कालस्य सुमाली नाम राक्षसः ।
रसातलान्मर्त्यलोकं सर्वं वै विचचाअर ह ॥१॥

नीलजीमूतसङ्काशस्तप्तकाञ्चनकुण्डलः ।
कन्यां दुहितरं गृह्य विना पद्ममिव श्रियम् ।
अथापश्यत्स गच्छन्तं पुष्पकेण धनेश्वरम् ॥२॥

तं दृष्ट्वामरसङ्काशं गच्छन्तं पावकोपमम् ।
अथाब्रवीत्सुतां रक्षः कैकसीं नाम नामतः ॥३॥

पुत्रि प्रदानकालोऽयं यौवनं तेऽतिवर्तते ।
त्वत्कृते च वयं सर्वे यन्त्रिता धर्मबुद्धयः ॥४॥

त्वं हि सर्वगुणोपेता श्रीः सपद्मेव पुत्रिके ।
प्रत्याख्यानाच्च भीतैस्त्वं न वरैः प्रतिगृह्यसे ॥५॥

कन्या पितृत्वं दुःखं हि सर्वेषां मानकाङ्क्षिणाम् ।
न ज्ञायते च कः कन्यां वरयेदिति पुत्रिके ॥६॥

मातुः कुलं पितृकुलं यत्र चैव प्रदीयते ।
कुलत्रयं सदा कन्या संशये स्थाप्य तिष्ठति ॥७॥

सा त्वं मुनिवरश्रेष्ठं प्रजापतिकुलोद्भवम् ।
गच्छ विश्रवसं पुत्रि पौलस्त्यं वरय स्वयम् ॥८॥

ईदृशास्ते भविष्यन्ति पुत्राः पुत्रि न संशयः ।
तेजसा भास्करसमा यादृशोऽयं धनेश्वरः ॥९॥

एतस्मिन्नन्तरे राम पुलस्त्य तनयो द्विजः ।
अग्निहोत्रमुपातिष्ठच्चतुर्थ इव पावकः ॥१०॥

सा तु तां दारुणां वेलामचिन्त्य पितृगौरवात् ।
उपसृत्याग्रतस्तस्य चरणाधोमुखी स्थिता ॥११॥

स तु तां वीक्ष्य सुश्रोणीं पूर्णचन्द्रनिभाननाम् ।
अब्रवीत्परमोदारो दीप्यमान इवौजसा ॥१२॥

भद्रे कस्यासि दुहिता कुतो वा त्वमिहागता ।
किं कार्यं कस्य वा हेतोस्तत्त्वतो ब्रूहि शोभने ॥१३॥

एवमुक्ता तु सा कन्या कृताञ्जलिरथाब्रवीत् ।
आत्मप्रभावेन मुने ज्ञातुमर्हसि मे मतम् ॥१४॥

किं तु विद्धि हि मां ब्रह्मञ्शासनात्पितुरागताम् ।
कैकसी नाम नाम्नाहं शेषं त्वं ज्ञातुमर्हसि ॥१५॥

स तु गत्वा मुनिर्ध्यानं वाक्यमेतदुवाच ह ।
विज्ञातं ते मया भद्रे कारणं यन्मनोगतम् ॥१६॥

दारुणायां तु वेलायां यस्मात्त्वं मामुपस्थिता ।
शृणु तस्मात्सुतान्भद्रे यादृशाञ्जनयिष्यसि ॥१७॥

दारुणान्दारुणाकारान्दारुणाभिजनप्रियान् ।
प्रसविष्यसि सुश्रोणि राक्षसान्क्रूरकर्मणः ॥१८॥

सा तु तद्वचनं श्रुत्वा प्रणिपत्याब्रवीद्वचः ।
भगवन्नेदृशाः पुत्रास्त्वत्तोऽर्हा ब्रह्मयोनितः ॥१९॥

अथाब्रवीन्मुनिस्तत्र पश्चिमो यस्तवात्मजः ।
मम वंशानुरूपश्च धर्मात्मा च भविष्यति ॥२०॥

एवमुक्ता तु सा कन्या राम कालेन केन चित् ।
जनयामास बीभत्सं रक्षोरूपं सुदारुणम् ॥२१॥

दशशीर्षं महादंष्ट्रं नीलाञ्जनचयोपमम् ।
ताम्रौष्ठं विंशतिभुजं महास्यं दीप्तमूर्धजम् ॥२२॥

जातमात्रे ततस्तस्मिन्सज्वालकवलाः शिवाः ।
क्रव्यादाश्चापसव्यानि मण्डलानि प्रचक्रिरे ॥२३॥

ववर्ष रुधिरं देवो मेघाश्च खननिस्वनाः ।
प्रबभौ न च खे सूर्यो महोल्काश्चापतन्भुवि ॥२४॥

अथ नामाकरोत्तस्य पितामहसमः पिता ।
दशशीर्षः प्रसूतोऽयं दशग्रीवो भविष्यति ॥२५॥

तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः ।

प्रमाणाद्यस्य विपुलं प्रमाणं नेह विद्यते ॥ २६ ॥

ततः शूर्पणखा नाम सञ्जज्ञे विकृताननाः ।
विभीषणश्च धर्मात्मा कैकस्याः पश्चिमः सुतः ॥ २७ ॥

ते तु तत्र महारण्ये ववृधुः सुमहौजसः ।
तेषां क्रूरो दशग्रीवो लोकोद्वेगकरोऽभवत् ॥ २८ ॥

कुम्भकर्णः प्रमत्तस्तु महर्षीन्धर्मसंश्रितान् ।
त्रैलोक्यं त्रासयन्दुष्टो भक्षयन्विचचार ह ॥ २९ ॥

विभीषणस्तु धर्मात्मा नित्यं धर्मपथे स्थितः ।
स्वाध्यायनियताहार उवास नियतेन्द्रियः ॥ ३० ॥

अथ वित्तेश्वरो देवस्तत्र कालेन केन चित् ।
आगच्छत्पितरं द्रष्टुं पुष्पकेण महौजसं ॥ ३१ ॥

तं दृष्ट्वा कैकयी तत्र ज्वलन्तमिव तेजसा ।
आस्थाय राक्षसीं बुद्धिं दशग्रीवमुवाच ह ॥ ३२ ॥

पुत्रवैश्रवणं पश्य भ्रातरं तेजसा वृतम् ।
भ्रातृभावे समे चापि पश्यात्मानं त्वमीदृशम् ॥ ३३ ॥

दशग्रीव तथा यत्नं कुरुष्वामितविक्रम ।
यथा भवसि मे पुत्र शीघ्रं वैश्वरणोपमः ॥ ३४ ॥

मातुस्तद्वचनं श्रुत्वा दशग्रीवः प्रतापवान् ।
अमर्षमतुलं लेभे प्रतिज्ञां चाकरोत्तदा ॥ ३५ ॥

सत्यं ते प्रतिजानामि तुल्यो भ्रात्राधिकोऽपि वा ।
भविष्याम्यचिरान्मातः सन्तापं त्यज हृद्गतम् ॥ ३६ ॥

ततः क्रोधेन तेनैव दशग्रीवः सहानुजः ।
प्राप्स्यामि तपसा काममिति कृत्वाध्यवस्य च ।
आगच्छदात्मसिद्ध्यर्थं गोकर्णस्याश्रमं शुभम् ॥ ३७ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com